संस्कृतवार्ता:
26.05.2025
प्रात: - 06:55

प्रधानमन्त्री-रोज़गारमेलापकम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्य-श्रव्य-परान्तर्जालीयमाध्यमेन विभिन्नेषु सर्वकारीय-विभागेषु सङ्घटनेषु च नवनियुक्तेभ्य: युवभ्य: एकपञ्चाशत्सहस्राणि नियुक्तिपत्राणि वितरिष्यति। अत्रावसरे श्रीमोदी उपस्थितान् जनान् अपि सम्बोधयिष्यति। वृत्यवसर-सृजन-क्षमतायै सर्वोच्चप्राथमिकतां प्रदातुं प्रधानमन्त्रिण: प्रतिबद्धतानुरूपम् अयं हि पञ्चदशम: वृत्त्यवसर-मेलक: अशेषे हि देशे सप्तचत्वारिंशत्स्थानेषु आयोजयिष्यते। अयं हि निश्चप्रचं युवभ्य: तस्य सशक्तिकरणे राष्ट्रियविकासे प्रभावियोगदानाय सार्थकम् अवसरम् प्रदास्यति। एते नवनियुक्ता: केन्द्रप्रशासनस्य विविधेषु मन्त्रालयेषु विभागेषु च नियोजिता: भविष्यन्ति।

अमितशाह:-सिन्धु:

केन्द्रीयगृहमन्त्री अमितशाह: ह्य: नवदिल्ल्यां स्वावासे पाकिस्तानेन सह हस्ताक्षरितस्य षष्ट्यधिक-नवदशशततमवर्षस्य सिन्धु-जल-सन्धे: विषयम् समाश्रित्य उच्चस्तरीयोपवेशनम् विहितवान्। अवधेयं वर्तते यत् पहलगामातङ्ककीयाक्रमणम् अभिलक्ष्य भारतेन सिन्धु-जल-सन्धि: निरस्तीकृत:। एतस्मिन् उपवेशने विदेशमन्त्री डॉ. एस्. जयशङ्कर: केन्द्रीयजलशक्तिमन्त्री सी.आर्. पाटिल: अन्ये च वरिष्ठाधिकारिण: समाविष्टा: आसन्। उपवेशनान्तरं वार्ताहरान् संसूचयन् जलशक्तिमन्त्री प्रावोचत् यत् सिन्धु-जल-सन्धौ प्रशासनेन गृहीत: एष: निर्णय: पूर्णतया न्याययुत: राष्ट्राय हितकर: च वर्तते। असौ अवदत् यत् प्रशासनेन इदमपि सुनिश्चीयते यत् सिन्धु नद्या: एकमपि जलकणम् पाकिस्तानदेशाय नैव प्रदातव्यम्।

गृहमन्त्री-पाकिस्तानम्

पहलगामातङ्क्याक्रमणम् अवलम्ब्य भारतेन पाकिस्तान-देशीयानां नागरिकाणां वीजाइत्येतत् पत्रस्य निरसनस्य एकदिवसस्य अनन्तरं केन्द्रीयगृहमन्त्री अमितशाह: राज्यानां मुख्यमन्त्रिभिस्साकम् वार्तां कृतवान् तथा च तान् आदिष्टवान् यत् तै: समेषां पाकिस्तान-देशीयानाम् नागरिकाणाम् अभिज्ञानम् करणीयमिति। अत्रावधौ केन्द्रीयगृहसचिव: गोविन्दमोहनेऽपि दृश्य-श्रव्य-तन्त्र-प्रणाल्या: माध्यमेन सर्वेषांराज्यानां केन्द्रशासितप्रदेशानाञ्च मुख्य-सचिवै: समम् उपवेशनं समाहूतवान्। अपि च वीजा इति पारगमनानुमतिपत्रस्य निरसनादेशस्य कठोरतया अनुपालनाय आदेशमपि प्रख्यापितवान्।

राष्ट्रपति:वेटिकनसिटीनगरम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: वेटिकनसिटी-इत्येतस्य नगरस्य सेण्ट्-पीटर-इत्यस्य बेसिलिका-इत्यत्र पोप-फ्रांसिस-इत्येतस्मै पुष्पमालां समर्पयन्ती श्रद्धाञ्जलिम् अददात्। राष्ट्रपति: वेटिकन-सिटी-नगरे पोपफ्रांसिस-इत्येतस्य राजकीयान्त्येष्टिसंस्कारे भागं ग्रहीतुं ह्य: इटलीदेशस्य रोमनगरं सम्प्राप्तवान्। राष्ट्रपति: वेटिकन-सिटी-इत्येतस्य

द्विदिवसीययात्रारतास्ति। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये सूचितं यत् अद्य राष्ट्रपति: मुर्मु: अन्तिमसंस्कारकर्मणि सम्मिलिता भविष्यति एतस्मिन्। अत्र च विश्वस्य गणमान्यजना: भागं ग्रहीष्यन्ति।

मनोहरलाल:

केन्द्रीयोर्जामन्त्री मनोहरलाल: अद्य सिक्किमराज्यस्य गङ्गटोकनगरे पूर्वोत्तरक्षेत्रस्य ऊर्जामन्तिर्णां सम्मेलने भागं ग्रहीष्यति। पूर्वोत्तरराज्यानां सर्वे ऊर्जामन्त्रिण: वरिष्ठाधिकारिण: च अस्मिन् कार्यक्रमे भागं स्वीकरिष्यन्ति।

'मन की बात'-कार्यक्रम:

प्रधानमन्त्री नरेन्द्रमोदी श्व: एकादशवादने स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदम् एकविंशत्यधिकैकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अयं कार्यक्रमः क्षेत्रीय-भाषासु अपि प्रसारयिष्यते।

आई.पी.एल्.

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-स्पर्धा-मालिकायाम् ह्य: रात्रौ एम्.ए. चिदम्बरम्-क्रीडाङ्गणे सनराइजर्स-हैदराबाद-दलेन चेन्नै-सुपर-किंग्स-दलम् पञ्चक्रीडकानां हानिपुरस्सरम् पराजितम्। अद्य, ईडन-गार्डन्स-क्रीडाङ्गणे कोलकाता-नाइट-राइडर्स-पञ्जाब-किंग्स-दलयोर्मध्ये सामुख्यं भविष्यति।

।। इति वार्ता:।।